# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

अनुवादकौ– डॉ. राकेशदाशः*, शान्तनुनायेकः†

## प्रथमः खण्डः– द्वितीयः अध्यायः (कामारपुकुरम् पितृपरिचयश्च)

### कामारपुष्करप्रदेशस्य पूर्वसमृद्धिः वर्तमानस्थितिश्च

१८६७ खीष्टाब्दे मलेरियारोगजनितायाः महामार्याः उद्भवात् पूर्वं कृषिप्रधानस्य वङ्गप्रदेशस्य सर्वेषु पल्लीग्रामेषु या अपूर्वा शान्तिः विद्यते स्म सा अनिर्वचनीया। विशेषतः हुगलीमण्डलान्तर्गते अस्मिन् ग्रामप्रदेशे विद्यमानस्य सर्वस्य विस्तीर्णधान्यप्रान्तरस्य मध्ये विराजमानाः लघुग्रामाः बृहति हरितसमुद्रे भासमानाः द्वीपाः इव प्रतीयन्ते स्म। भूमेः उर्वरतायाः खाद्यद्रव्यस्य अनभावत्वात् निर्मलवायौ नित्यपरिश्रमकारणाच्च ग्रामवासिनः देहे स्वास्थ्यसबलते मनसि प्रीतिसन्तोषौ च सदा परिलक्ष्यन्ते स्म। येषु ग्रामेषु जनानाम् आधिक्यं वर्तते तेषु सर्वेषु ग्रामेषु कृषिकार्यातिरिक्ते लघुलघुशिल्पकार्ये अपि जनाः नियुक्ताः आसन्। तद्रूपेण कुण्डलिका-मधुरादीनां प्रस्तुतीकरणात् कामारपुष्करं चिरं प्रसिद्धिं गतम्। अपि च आबलूसदारुनिर्मितहुक्कायन्त्रनलिकानिर्माणेन एषः ग्रामः कलिकातानगरेण सह व्यवसायेन अद्यापि किञ्चिद् धनम् अर्जयति। सूत्र-गात्रमार्जनी-वस्त्रादिनिर्माणेन किञ्च अन्येन विभिन्नेन शिल्पकार्येणापि कामारपुष्करं प्रसिद्धिं गतम्। विष्णु-चापडिप्रभृतयः केचन प्रथितयशसः वस्त्रव्यवसायिनः अस्मिन् ग्रामे उषित्वा तदा कलिकातया सह बहुधनानां व्यवसायं कुर्वन्ति स्म। इदानीमपि ग्रामे प्रतिशनिमङ्गलवासरं हट्टः भवति। ताराहाट-वदनगञ्ज-सिहड-देशडाप्रभृतिभ्यः पार्श्वस्थेभ्यः ग्रामेभ्यः जनाः सूत्रं, वस्त्रं, गात्रमार्जनी, हण्डिका, कलसः, शूर्पः, वर्तुलाकारशूर्पः, कटः इत्यादि सांसारिकं नित्यव्यावहारिकं पण्यं क्षेत्रजं च सर्वं द्रव्यं हट्टदिवसे कामारपुष्करम् आनयन्ति, क्रयविक्रयादिकं च कुर्वन्ति। ग्रामे आनन्दोत्सवस्य अभावः इदानीमपि न परिलक्ष्यते। चैत्रमासि मनसापूजा शिवस्य गाजनाख्ये उत्सवे, अपि च वैशाखे ज्यैष्ठे वा चतुर्विंशतिप्रहरीय-हरिवासरे कामारपुष्करं प्रसन्नं भवति। तद्विहाय भूस्वामिगृहे द्वादशमासं यावत् सर्वविधः उत्सवः, किञ्च प्रतिष्ठितेषु सर्वेषु देवालयेषु नित्यपूजा उत्सवादि च अनुष्ठीयेते। वस्तुतः दारिद्र्यवशात् वर्तमानकाले तेषु बहूनां लोपः जातः।

### तस्मिन् प्रदेशे धर्मठाकुरस्य पूजा

धर्मठाकुरस्य पूजायाम् अपि अत्र एकदा विशेष आडम्बर आसीत्। किन्तु इदानीम् सः कालः नास्ति, बौद्धत्रिरत्ने अन्यतमः श्रीधर्मः अधुना कुर्ममूर्तिरूपेण परिणम्य अत्र पार्श्वस्थेषु सर्वेषु ग्रामेषु च पूजामात्रम् एव प्राप्नोति। ब्राह्मणा अपि समयानुसारेण मूर्तिपूजां कुर्वन्ति इति

* विभागाध्यक्षः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।
† शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

द्रष्टुं शक्यते। उक्तस्य धर्मठाकुरस्य भिन्नं भिन्नं नाम ग्रामान्तरेषु श्रूयते। यथा– कामारपुष्करस्थस्य धर्मठाकुरस्य नाम— 'राजाधिराजः धर्मः' इति। श्रीपुरे प्रतिष्ठितस्य उक्तस्य ठाकुरस्य नाम— 'यात्रासिद्धिरायः धर्मः' इति। एवमेव मुकुन्दपुरस्य समीपे मधुवाटी इत्याख्ये ग्रामे प्रतिष्ठितस्य धर्मस्य नाम— 'सन्न्यासीरायः धर्मः' इति। कामारपुष्करस्थस्य प्रतिष्ठितस्य धर्मस्य रथयात्रापि एकदा महासमारोहरूपेण सम्पन्ना भवति स्म। नवचूडासमन्वितः सुदीर्घः रथः तदा तस्य मन्दिरपार्श्वे सदा नयनगोचरीभवति स्म। रथभग्नानन्तरं सः रथः पुनः न निर्मितः। धर्ममन्दिरम् अपि संस्काराभावात् धूलिसात् भवति इति दृष्ट्वा धर्मपण्डितः यज्ञेश्वरः तस्य स्वगृहे ठाकुरस्य स्थापनम् अकरोत्।

## हालदारपुष्करिणी, भूतिर् खाल्, आम्रकाननम् इत्यादीनां कथा

ब्राह्मणः, कायस्थः, तन्तुवायः, सद्गोपः, लोहकारः, कुम्भकारः, धीवरः, चण्डालः इत्यादीनाम् उच्चनीचानां सर्वेषाम् एव कूलानां वसतिः आसीत् कामारपुष्करे। ग्रामे तिसृचतस्रः बृहत्यः पुष्करिण्यः सन्ति। तासु हालदारपुष्करिणी एव सर्वापेक्षया बृहती। एतद्भिन्नाः लघुपुष्करिण्यः अपि बह्व्यः सन्ति। तासां मध्ये पुनः काश्चन शतदलपद्म-कुमुद-कह्लारश्रेणीः उरसि धृत्वा अपूर्वां शोभां विस्तारयन्ति। ग्रामे इष्टिकानिर्मितगृहस्य समाधिस्थलस्य च असद्भावः नास्ति। पूर्वं तेषां संख्या बह्वधिका आसीत्। रामानन्द-शाँखारिणः भग्ना भित्तिका, फकिर-दत्तस्य जीर्णः रासमञ्चः, वनाकीर्णः इष्टिकास्तूपः परित्यक्तदेवालयाः च इत्यादिषु नैकेषु स्थानेषु विद्यमानाः सन्तः तद्विषयस्य, अपि च ग्रामः पूर्वं समृद्धः आसीत् इति विषयस्य च परिचयं प्रददाति। ग्रामस्य ईशानदिशि वायुदिशि च 'बुधुइ मोडल्', 'भूतीर् खाल्' इति नामके द्वे श्मशाने विद्यमाने स्तः। अन्तिमोक्तस्य स्थानस्य प्रतीच्यां गोचर-प्रान्तः, मानिकराजप्रतिष्ठितं सर्वसाधारणानाम् उपभोग्यम् आम्रकाननम् आमोदरनदश्च विद्यमाने वर्तेते। भूतिर् खाल् इति दक्षिणस्यां प्रवहत् अनतिदूरम् उक्तेन नदेन सह सममिलत्।

## भूरसुवो-ग्रामस्य मानिकराजा

कामारपुष्कराद् उत्तरस्यां क्रोशार्धे भूरसुवो ग्रामः। श्रीयुक्तः मानिकचन्द्र-वन्द्योपाध्यायः इत्याख्यस्य एकस्य धनाढ्यव्यक्तेः तत्र वासः आसीत्। चतुष्पार्श्वस्थेषु सर्वेषु ग्रामेषु एषः 'मानिकराजा' इति नाम्ना परिचितः आसीत्। पूर्वोक्तम् आम्रकाननम् अतिरिच्य सुखसायेर हातिसायेर इत्यादयः बृहत्यः सर्वाः दीर्घिकाः इदानीम् अपि अस्य कीर्तिम् उद्घोषयन्ति। श्रूयते, अस्य गृहे लक्षाधिकाः ब्राह्मणाः बहुवारं आमन्त्रिताः सन्तः भोजनं कृतवन्तः।

## गडमान्दारणम्

कामारपुष्करं दक्षिणपूर्वेण (आग्नेयदिशि) मान्दारणग्रामः। चतुष्पार्श्वस्थान् सर्वान् ग्रामान् अरेः आक्रमणाद् रक्षयितुं पूर्वं कदाचिद् अत्र दुर्भेद्यः एकः दुर्गः प्रतिष्ठितः आसीत्। पार्श्ववर्तिनः लघुकायस्य आमोदरनदस्य गतिं कौशलेन परिवर्त्य उक्तस्य दुर्गस्य परिखारूपेण परिवर्तितवन्तः।

## उचालनस्य दीर्घिका मोगलमारेः युद्धक्षेत्रं च

मान्दारणदुर्गस्य भग्नतोरणं स्तूपः परिखा च, अपि च तस्य अनतिदूरं शैलेश्वरमहादेवस्य मन्दिरम् इदानीम् अपि विद्यमानं सत् पाठानादीनां भूशासनकाले एतेषां स्थानानां प्रसिद्धेः परिचयं प्रददाति। दुर्गमान्दारणस्य पार्श्वाद् वर्धमानं प्रति गमनागमनाय पूर्वोक्तः मार्गः गतः। तस्य पथः उभयस्मिन् पार्श्वे बह्व्यः दीर्घिकाः नयनगोचरीभवन्ति। उक्ताद् दुर्गात् प्रायः नवक्रोशाद् उत्तरस्यां दिशि स्थिता उचालनाख्यस्थानस्य दीर्घिका एव तासु सर्वासु बृहती वर्तते। उक्तस्य पथः एकस्मिन् स्थाने एका भग्ना हस्तिशालापि परिलक्षिता भवति। एतेषां सर्वेषां दर्शनेन अवगम्यते यत्, युद्धविग्रहादीनां सौकर्याय एव एते पन्थानः निर्मिताः इति। मोगलमारेः प्रसिद्धं युद्धक्षेत्रं पथि विद्यमानं सत् तद्विषयस्य प्रमाणं प्रददाति।